# गणपति प्रार्थन gaṇapati prārthana

---

ॐ गणानां त्वा गणपतिगं हवामहे कविं कवीनामुपमश्रवस्तमम् ।

**om gaṇānāṁ tvā gaṇapatigṁ havāmahe**
**kaviṁ kavīnāmupamaśravastamam |**

ज्येष्ठराजं ब्रह्मणाम् ब्रह्मणस्पत आ नः श्रुण्वन्नूतिभिस्सीद सादनम् ॥

**jyeṣṭharājaṁ brahmaṇām brahmaṇaspata**
**ā naḥ śruṇvannūtibhissīda sādanam ||**

प्रणो देवी सरस्वती वाजेभिर्वाजिनीवती ।

**praṇo devī sarasvatī vājebhirvājinīvatī|**

धीनामवित्र्यवतु । गणेशाय नमः । सरस्वत्यै नमः । श्री गुरुभ्यो नमः । हरिः ओम् ॥

**dhīnāmavitryavatu| gaṇeśāya namaḥ| sarasvatyai namaḥ|**
**śrī gurubhyo namaḥ|**
**hariḥ om||**

ॐ शान्तिः शान्तिः शान्तिः ॥

**om śāntiḥ śāntiḥ śāntiḥ||**

# मन्त्र पुष्पम्   mantra puṣpam

---

ॐ योऽपां पुष्पं वेद । पुष्पवान् प्रजावान् पशुमान् भवति ।

**om yo'pāṁ puṣpaṁ veda| puṣpavān prajāvān paśumān bhavati |**

चन्द्रमा वा अपां पुष्पम् । पुष्पवान् प्रजावान् पशुमान् भवति ।
य एवं वेद । योऽपामायतनं वेद । आयतनवान् भवति ॥ १ ॥

**candramā vā apāṁ puṣpam| puṣpavān prajāvān paśumān bhavati | ya evaṁ veda | yo'pāmāyatanaṁ veda | āyatanavān bhavati || 1||**

---

अग्निर्वा अपामायतनम् । आयतनवान् भवति । योऽग्नेरायतनं वेद । आयतनवान् भवति ।

**agnirvā apāmāyatanam| āyatanavān bhavati |**
**yo'gnerāyatanaṁ veda | āyatanavān bhavati |**

आपो वा अग्नेरायतनम् । आयतनवान् भवति । य एवं वेद । योऽपामायतनं वेद । आयतनवान् भवति ॥

**āpo vā agnerāyatanam | āyatanavān bhavati | ya evaṁ veda | yo'pāmāyatanaṁ veda | āyatanavān bhavati ||**

वायुर्वा अपामायतनम्। आयतनवान् भवति। यो वायोरायतनं वेद। आयतनवान् भवति।

**vāyurvā apāmāyatanam| āyatanavān bhavati |**
**yo vāyorāyatanaṁ veda | āyatanavān bhavati |**

आपो वै वायोरायतनम्। आयतनवान् भवति। य एवं वेद। योऽपामायतनं वेद। आयतनवान् भवति॥

**āpo vai vāyorāyatanam| āyatanavān bhavati | ya evaṁ veda |**
**yo'pāmāyatanaṁ veda | āyatanavān bhavati ||**

असौ वै तपन्नपामायतनम्। आयतनवान् भवति।
योऽमुष्य तपत आयतनं वेद। आयतनवान् भवति।

asau vai tapannapāmāyatanam| āyatanavān bhavati |
yo'muṣya tapata āyatanaṁ veda | āyatanavān bhavati |

आपो वा अमुष्य तपत आयतनम्। आयतनवान् भवति।
य एवं वेद। योऽपामायतनं वेद। आयतनवान् भवति॥

**āpo vā amuṣya tapata āyatanam| āyatanavān bhavati**
**ya evaṁ veda | yo'pāmāyatanaṁ veda | āyatanavān bhavati ||**

चन्द्रमा वा अपामायतनम्। आयतनवान् भवति।
यश्चन्द्रमस आयतनं वेद। आयतनवान् भवति।
candramā vā apāmāyatanam | āyatanavān bhavati |
yaścandramasa āyatanaṁ veda | āyatanavān bhavati
आपो वै चन्द्रमस आयतनम्। आयतनवान् भवति।
य एवं वेद। योऽपामायतनं वेद। आयतनवान् भवति॥
**āpo vai candramasa āyatanam| āyatanavān bhavati |**
**ya evaṁ veda | yo'pāmāyatanaṁ veda | āyatanavān bhavati ||**

नक्षत्राणि वा अपामायतनम्। आयतनवान् भवति।
यो नक्षत्राणामायतनं वेद। आयतनवान् भवति।
**nakṣatrāṇi vā apāmāyatanam| āyatanavān bhavati |**
**yo nakṣatrāṇāmāyatanaṁ veda| āyatanavān bhavati**
आपो वै नक्षत्राणामायतनम्। आयतनवान् भवति।
य एवं वेद। योऽपामायतनं वेद। आयतनवान् भवति॥
**āpo vai nakṣatrāṇāmāyatanam| āyatanavān bhavati |**
**ya evaṁ veda | yo'pāmāyatanaṁ veda | āyatanavān bhavati ||**

पर्जन्यो वा अपामायतनम्। आयतनवान् भवति।
यः पर्जन्यस्यायतनं वेद। आयतनवान् भवति।

**parjanyo vā apāmāyatanam| āyatanavān bhavati |**
**yaḥ parjanyasyāyatanaṁ veda | āyatanavān bhavati**

आपो वै पर्जन्यस्याऽऽयतनम्। आयतनवान् भवति।
य एवं वेद। योऽपामायतनं वेद। आयतनवान् भवति॥

āpo vai parjanyasyā''yatanam| āyatanavān bhavati |
ya evaṁ veda | yo'pāmāyatanaṁ veda | āyatanavān bhavati ||

संवत्सरो वा अपामायतनम्। आयतनवान् भवति।
यस्संवत्सरस्यायतनं वेद। आयतनवान् भवति।

**saṁvatsaro vā apāmāyatanam| āyatanavān bhavati |**
**yassaṁvatsarasyāyatanaṁ veda | āyatanavān bhavati**

आपो वै संवत्सरस्यायतनम्। आयतनवान् भवति।
य एवं वेद। योऽप्सु नावं प्रतिष्ठितां वेद। प्रत्येव तिष्ठति॥

āpo vai saṁvatsarasyāyatanam | āyatanavān bhavati |
ya evaṁ veda| yo'psu nāvaṁ pratiṣṭhitāṁ veda | pratyeva tiṣṭhati ||

राजाधिराजाय प्रसह्यसाहिने । नमो वयं वैश्रवणाय कुर्महे । स मे कामान्कामकामाय मह्यम् ।

rājādhirājāya prasahyasāhinee। namoo vayaṁ vaiśravaṇāya kurmahee।
sa mee kāmānkāmakāmāya mahyam।

कामेश्वरो वैश्रवणो ददातु । कुबेराय वैश्रवणाय । महाराजाय नमः ॥

kāmeeśvaroo vaiśravaṇoo dadātu। kubeerāya vaiśravaṇāya। mahārājāya namaḥ।।

**ॐ शान्तिः शान्तिः शान्तिः ॥**

**om śāntiḥ śāntiḥ śāntiḥ।।**

# नारायण सूक्तम्  nārāyaṇa sūktam

ॐ ॥ सहस्रशीर्॑षं दे॒वं॒ वि॒श्वाक्षं॑ वि॒श्वश॑म्भुवम् ।

**Om || sahasraśīrṣaṁ devaṁ viśvākṣaṁ viśvaśambhuvam|**

विश्वं॑ नारा॑यणं दे॒वम॒क्षरं॑ पर॒मं प॒दम् ॥

**viśvaṁ nārāyaṇaṁ devamakṣaraṁ paramaṁ padam||**

वि॒श्वतः॒ पर॑मान्नि॒त्यं॒ वि॒श्वं ना॑राय॒णग्ं ह॑रिम् ।

**viśvataḥ paramānnityaṁ viśvaṁ nārāyaṇagṁ harim|**

विश्व॑मे॒वेदं॒ पुरु॑ष॒-स्तद्विश्व॒-मुप॑जीवति ॥

**viśvamevedaṁ puruṣa-stadviśva-mupajīvati||**

पतिं॒ विश्व॑स्या॒त्मेश्व॑र॒ग्ं॒ शाश्व॑तग्ं शि॒व-मच्यु॑तम् ।

**patiṁ viśvasyātmeśvaragṁ śāśvatagṁ śiva-macyutam|**

ना॒रा॒यणं म॑हाज्ञे॒यं॒ वि॒श्वात्मा॑नं प॒राय॑णम् ॥

**nārāyaṇaṁ mahājñeyaṁ viśvātmānaṁ parāyaṇam||**

ना॒रा॒यणप॑रो ज्यो॒ति॒-रा॒त्मा ना॑राय॒णः प॑रः ।

nārāyaṇaparojyoti-rātmā nārāyaṇaḥ paraḥ|

ना॒रा॒यण प॑रं ब्र॒ह्म॒ त॒त्त्वं ना॑राय॒णः प॑रः ।

nārāyaṇa paraṁ brahma tattvaṁ nārāyaṇaḥ paraḥ|

ना॒रा॒यण-प॑रो ध्या॒ता॒ ध्या॒नं ना॑राय॒णः प॑रः ॥

nārāyaṇa-paro dhyātā dhyānaṁ nārāyaṇaḥ paraḥ||

यच्च किंचिज्जगत्सर्वं दृश्यते श्रूयतेऽपिवा ।

**yacca kiṁcijjagatsarvaṁ dṛśyate śrūyate'pivā|**

अन्तर्बहिश्च तत्सर्वं व्याप्य नारायण-स्थितः ॥

antarbahiśca tatsarvaṁ vyāpya nārāyaṇa-sthitaḥ||

अनन्तमव्ययं कविगं समुद्रेऽन्तं विश्वशम्भुवम् ।

**anantamavyayaṁ kavigṁ samudre'ntaṁ viśvaśambhuvam|**

पद्मकोश-प्रतीकाशगं हृदयं चाप्यधोमुखम् ॥

**padmakośa-pratīkāśagṁ hṛdayaṁ cāpyadhomukham||**

अधोनिष्ट्या वितस्त्यान्ते नाभ्यामुपरि तिष्ठति ।

**adhoniṣṭyā vitastyānte nābhyāmupari tiṣṭhati|**

ज्वालमालाकुलं भाति विश्वस्यायतनं महत् ॥

**jvālamālākulaṁ bhāti viśvasyāyatanaṁ mahat||**

सन्ततगं शिलाभिस्तु लम्बत्याकोशसन्निभम् ।

**santatagṁ śilābhistu lambatyākośasannibham|**

तस्यान्ते सुषिरगं सूक्ष्मं तस्मिन् सर्वं प्रतिष्ठितम् ॥

**tasyānte suṣiragṁ sūkṣmaṁ tasmin sarvaṁ pratiṣṭhitam||**

तस्य मध्ये महानग्नि-र्विश्वार्चि-र्विश्वतोमुखः ।

**tasya madhye mahānagni-rviśvārci-rviśvatomukhaḥ|**

सोऽग्रभुग्विभजन्तिष्ठ-न्नाहारमजरः कविः ॥

**so'grabhu̱gvibhajanti̱ṣṭha̱-nnāahāramaja̱raḥ ka̱viḥ||**

तिर्यगूर्ध्व-मधश्शायी रश्मयस्तस्य सन्तता ।

**ti̱rya̱gū̱rdhva-madhaśśā̱yī̱ ra̱śmayastasya̱ santatā|**

सन्तापयति स्वंदेहमापादतलमस्तकः ।

**sa̱ntā̱payati svande̱hamāpādatala̱mastakaḥ|**

तस्य मध्ये वह्निशिखा अणीयोर्ध्वा व्यवस्थितः ॥

**tasya̱ madhye̱ vahniśikhā a̱ṇīyordhvā vya̱vasthitaḥ||**

नीलतो-यदमध्यस्था-द्विद्युल्लेखेव भास्वरा ।

**nī̱lato-yadamadhya̱sthā̱-dvi̱dyullekheva̱ bhāsvarā|**

नीवारशूकवत्तन्वी पीताभास्वत्यणूपमा ॥

**nī̱vāra̱śūkavatta̱nvī̱ pī̱tābhāsvatya̱ṇūpamā||**

तस्याः शिखाया मध्ये परमात्मा व्यवस्थितः ।

**tasyāḥ śikhā̱yā madhye pa̱ramātmā vya̱vasthitaḥ|**

स ब्रह्म स शिवः स हरिः सेन्द्रः सोऽक्षरः परमः स्वराट् ॥

**sa brahma̱ sa śiva̱ḥ sa hari̱ḥ sendra̱ḥ so'kṣaraḥ para̱maḥ sva̱rāṭ||**

ऋतगं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम् ।

**ṟtagṁ sa̱tyaṁ paraṁ bra̱hma̱ pu̱ruṣaṁ kṛṣṇa̱piṅgalam|**

ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमो नमः ॥

**ū̱rdhvaretaṁ virūpā̱kṣa̱ṁ vi̱śvarūpāya̱ vai namo̱ namaḥ||**

**ॐ नारायणाय विद्महे वासुदेवाय धीमहि ।**

**om nārāyaṇāya vidmahe vāsudevāya dhīmahi|**

**तन्नो विष्णुः प्रचोदयात् ॥**

**tanno viṣṇuḥ pracodayāt||**

**ॐ शान्तिः शान्तिः शान्तिः ॥**

**om śāntiḥ śāntiḥ śāntiḥ||**

# शिवोपासन मन्त्राः śivoopāsana mantrāḥ

निधनपतये नमः

nidhanapatayee namaḥ

निधनपतान्तिकाय नमः

nidhanapatāntikāya namaḥ

ऊर्ध्वाय नमः

ūrdhvāya namaḥ

ऊर्ध्वलिङ्गाय नमः

ūrdhvaliṅgāya namaḥ

हिरण्याय नमः

hiraṇyāya namaḥ

हिरण्यलिङ्गाय नमः

hiraṇyaliṅgāya namaḥ

सुवर्णाय नमः

suvarṇāya namaḥ

सुवर्णलिङ्गाय नमः

suvarṇaliṅgāya namaḥ

दिव्याय नमः

divyāya namaḥ

दिव्यलिङ्गाय॒ नमः

divyaliṅgāya̱ namaḥ

भवाय॒ नमः

bhavāya̱ namaḥ

भवलिङ्गाय॒ नमः

bhavaliṅgāya̱ namaḥ

शर्वाय॒ नमः

śarvāya̱ namaḥ

शर्वलिङ्गाय॒ नमः

śarvaliṅgāya̱ namaḥ

शिवाय॒ नमः

śivāya̱ namaḥ

शिवलिङ्गाय॒ नमः

śivaliṅgāya̱ namaḥ

ज्वलाय॒ नमः

jvalāya̱ namaḥ

ज्वललिङ्गाय॒ नमः

jvalaliṅgāya̱ namaḥ

आत्माय॒ नमः

ātmāya̱ namaḥ

**आत्मलिङ्गाय नमः**

ātmaliṅgāya namaḥ

**परमाय नमः**

paramāya namaḥ

**परमलिङ्गाय नमः**

paramaliṅgāya namaḥ

**एतथ्सोमस्य सूर्यस्य सर्वलिङ्गग्ं स्थापयति पाणिमन्त्रं पवित्रम्।**

etathsoomasya sūryasya sarvaliṅgagg sthāpayati pāṇimantraṁ pavitram।

**ॐ शान्तिः शान्तिः शान्तिः॥**

**om śāntiḥ śāntiḥ śāntiḥ।।**

# क्षमा प्रार्थन   kṣamā prārthana

ॐ यदक्षरपदभ्रष्टं मात्रहीनं तु यद् भवेत्।

om yadakṣarapadabhraṣṭaṁ mātrahīnaṁ tu yad bhaveet|

तत्सर्वं क्षम्यतां देव नारायण नमोस्तुते।

tatsarvaṁ kṣamyatāṁ deeva nārāyaṇa namoostutee|

विसर्गबिन्दुमात्राणि पदपादाक्षराणि च।

visargabindumātrāṇi padapādākṣarāṇi ca|

न्यूनानि चातिरिक्तानि क्षमस्व साईश्वर।

nyūnāni cātiriktāni kṣamasva sāīśvara|

अपराध सहस्राणि क्रियन्तेऽहर्निशं मया।

aparādha sahasrāṇi kriyantee'harniśaṁ mayā|

दासोऽयमिति मां मत्वा क्षमस्व साईश्वर।

dāsoo'yamiti māṁ matvā kṣamasva sāīśvara|

अन्यथा शरणं नास्ति त्वमेव शरणं मम

anyathā śaraṇaṁ nāsti tvameeva śaraṇaṁ mama

तस्मात् कारुण्य भावेन रक्ष रक्ष साईश्वर।

tasmāt kāruṇya bhāveena rakṣa rakṣa sāīśvara|

हरिः ॐ तत्सत् श्री साईश्वरार्पणमस्तु।

hariḥ om tatsat śrī sāīśvarārpaṇamastu|

ॐ शान्तिः शान्तिः शान्तिः॥

**om śāntiḥ śāntiḥ śāntiḥ||**